त्रुतमाम्रः। तत्पर्य्यायः। चक्रतलाम्रः २ मध्वाम्रः ३ सितजाम्रकः ४ वनेच्यः ५ मन्मथानन्दः ६ मदनेच्छाफलः ७। तस्य कोमलफलगुणाः। कटुत्वम्। अम्लत्वम्। पित्तदाहदत्वञ्च। तस्य सुपक्वफलगुणाः। स्वादुत्वम्। मधुरत्वम्। पुष्टिवीर्य्यबलप्रदत्वञ्च। इति राजनिर्घण्टः॥

बद्धशिखः, त्रि, (बद्धा शिखा चूड़ा यस्येति।) शिशुः। इति मेदिनी। खे, १५॥ शिखाबन्धनविशिष्टः। यथा, प्रायश्चित्ततत्त्वधृतवचनम्।

"सदोपवीतिना भाव्यं सदा बद्धशिखेन तु।
विशिखो व्युपवीतश्च यत् करोति न तत् कृतम्॥"

बद्धशिखा, स्त्री, (बद्धा शिखा यस्याः।) उच्चटा। इति मेदिनी। खे, १५॥ (बद्धा शिखा केशकलापो यस्याः।) सम्बद्धकेशा च॥

बध, क बन्धे। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) क, वाधयति। इति दुर्गादासः॥

बध, ङ निन्दे। बन्धे। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) ङ, बीभत्सते खलं लोकः। बधते तत्र त्वादयो न प्रयुज्यन्ते। इति रमानाथः।

'मावधिष्ठा जटायुं मां सीतां रामाहमेचिषि।' इति भट्टिः। ६। ४१॥ इति दुर्गादासः॥

बधिरः, त्रि, (बध्नाति कर्णमिति। बन्ध+"इषिमदिमुदीति।" उणा० १। ५२। इति किरच्।) श्रवणेन्द्रियरहितः। श्रुतिशक्तिहीनः। काला इति भाषा। तत्पर्य्यायः। एड़ः २। इत्यमरः। २। ६। ४८॥ कल्लः ३ अवणापटुः ४। इति शब्दरत्नावली॥ उच्चैःश्रवाः ५। इति संक्षिप्तसारोणादिवृत्तिः॥ (यथा, मनुः। ११। ५२।

"एवं कर्म्मविशेषेण जायन्ते सद्विगर्हिताः।
जड़मूकान्धबधिराविकृताकृतयस्तथा॥"

बाधिर्य्यनिदानं यथा,—

"यदा शब्दवहं वायुः स्रोत आवृत्य तिष्ठति।
शुद्धः श्लेष्मान्वितो वापि बाधिर्य्यं तेन जायते॥"
इति माधवकरः॥

असाध्यबाधिर्य्यमाह।

"बाधिर्य्यं बालवृद्धोत्थं चिरोत्थञ्च विवर्ज्जयेत्।"
इति भावप्रकाशः॥*॥

अस्यौषधम्।

"कर्णशूले कर्णनादे बाधिर्य्ये क्ष्वेड़ एव च।
चतुर्ष्वपि च रोगेषु सामान्यं भेषजं स्मृतम्॥
शृङ्गवेरञ्च मधु च सैन्धवं तैलमेव च।
कदुष्णं कर्णयोर्धार्य्यमेतत् स्याद्वेदनापहम्॥१॥
कर्णशूले कर्णनादे बाधिर्य्ये क्ष्वेड़ एव च।
पूरणं कटुतैलेन हितं वातघ्नमौषधम्॥२॥
शिखरिक्षारजवारिनकृतकल्केन साधितं
तैलम्।
अपहरति कर्णनादं बाधिर्य्यञ्चापि पूरणतः॥
शिखरी अपामार्गः॥३॥
गवां मूत्रेण विल्वानि पिष्ट्वा तैलं विपाचयेत्।
सजलञ्च घटुग्धञ्च तद्बाधिर्य्यहरं परम्॥
क्षीरमजाजं ग्राह्यम्। विल्वतैलम्॥४॥" इति भावप्रकाशः॥ यथा च।

"शुष्कमूलकशुण्ठीनां क्षारो हिङ्गुलनागरम्।
शुष्कं चतुर्गुणं दद्यात्तैलमेतैर्व्विपाचयेत्॥
बाधिर्य्यं कर्णशूलञ्च पूयस्रावञ्च कर्णयोः।
क्रिमयश्च विनश्यन्ति तैलस्यास्य प्रपूरणात्॥"५
इति गारुड़े १८७ अध्यायः॥

ब(व)धूः, स्त्री, (बध्नाति प्रेम्णा या। बन्ध+ऊः नलोपश्च। अन्तःस्थवादौ तु वहति संसारभारं उह्यते भर्त्रादिभिरिति वा। वह+"वहेर्धश्च।" उणा० १। ८५। इति ऊः धश्चान्तादेशः।) नारी। स्नुषा। एका। इत्यमरः। ३। ३। १०९, २। ४। १३३॥ (अस्याः पर्य्यायो यथा,—

"एका स्याद्ब्राह्मणी देवी मरुन्माला लता
लघुः।
समुद्रान्ता वधूः कोटिवर्षालङ्कापिकेत्यपि॥"
इति भावप्रकाशस्य पूर्व्वखण्डे १ भागे॥)

शारिवौषधिः। शटी। (अस्याः पर्य्यायो यथा,

"शटी पलाशी षड्ग्रन्था सुव्रता गन्धमूलिका।
गन्धारिका गन्धवधूर्वधूः पृथुपलाशिका॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

नवोढ़ा। (यथा, रघुः। ७। ४।

"वरः स वध्वा सह राजमार्गं
प्राप ध्वजच्छायनिवारितोष्णम्॥")

भार्य्या। इति मेदिनी। धे, १४॥ भरतेन अमरकोषटीकायां पवर्गीयबकारादिबन्धधातुना निष्पादितोऽयम्। मेदिनीकारेण तु अन्तःस्थवकारादिशब्दमध्ये संगृहीतः॥ अथ नववध्वा द्विरागमनयात्रा। तत्राष्टमदशमद्वादशषष्ठचतुर्थवर्षाणि निषिद्धानि। मासाः मार्गशीर्षफाल्गुनवैशाखा विहिताः। पक्षः शुक्लः। पुष्यस्वातीहस्ताधनिष्ठोत्तराषाढ़ोत्तरफल्गुन्युत्तरभाद्रपद्रेवतीमृगशिरोरोहिणीपुनर्व्वसुपूर्व्वाषाढ़ा एतानि नक्षत्राणि विहितानि। सोमबुधवृहस्पतिशुक्राणां वाराः विहिताः। तिथयो यात्राप्रकरणोक्ताः। चन्द्रताराशुद्धौ कालशुद्धौ चाहस्पर्शवारवेलादिक्शूलादीन् परित्यज्य कर्त्तव्या। इति ज्योतिषम्॥

"वृत्ते पाणिग्रहे गेहात् पितुः पतिगृहं प्रति।
पुनरागमनं वध्वास्तद्विरागमनं विदुः॥
विवाहमासि प्रथमं वध्वा नागमनं यदि।
तदा सर्व्वमिदं चिन्त्यं युग्माद्यब्दं विचक्षणैः॥
भुक्त्वा पितृगृहे नारी भुङ्क्ते स्वामिगृहे
यदि।
दौर्भाग्यं जायते तस्याः शपन्ति कुलनायिकाः॥"
इति ज्योतिस्तत्त्वम्॥

बधूजनः, पुं, (बधूरेव जनः।) योषित्। इति त्रिकाण्डशेषः॥ (यथा, माघे। ३। ५२।

"क्षितिप्रतिष्ठोऽपि मुखारविन्दै-
र्वधूजनश्चन्द्रमधश्चकार॥")

बधूटशयनं, क्ली, (बधूटीनां शयनमिव। पृषोदरादित्वात् ह्रस्वाकारः।) गवाक्षः। यथा,—

"वातायनं गृहाक्षः स्याद्वधूटशयनन्तथा॥"
इति त्रिकाण्डशेषः॥

बधूटिः } स्त्री, (अल्पवयस्का बधूः। अल्पार्थे
बधूटी, } टिः। पक्षे ङीष्। यद्वा, बधू+"वयस्यचरम इति वाच्यम्।" ४। १। २०। इत्यस्य वार्त्ति० इति ङीप्।) पुत्त्रभार्य्या। इति भरतधृतरत्नकोषः। सुवासिनी। इति हेमचन्द्रः॥ अल्पा बधूः। यथा,—

"नूतनजलधररुचये गोपबधूटीदुकूलचौराय।
तस्मै नमः कृष्णाय संसारमहीरुहस्य बीजाय॥"
इति भाषापरिच्छेदः। १॥

बधूत्सवप्रसवः, पुं, (बध्वा उत्सव आर्त्तवः स इव प्रसवः पुष्पादिर्यस्य।) रक्ताम्लानः। इति राजनिर्घण्टः॥

बध्रं, क्ली, (बध्यतेऽनेनेति। बन्ध+"सर्व्वधातुभ्यष्ट्रन्।" उणा० ४। १५८। इति ष्ट्रन्।) सीसकम्। इत्यमरः॥ वध्रमिति पठति स्वामी॥ (अस्य पर्य्यायो यथा,—

"सीसं बध्रञ्च वप्रञ्च योगेष्टं नागनामकम्॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

बध्री, स्त्री, (बध्यतेऽनया। बन्ध+"सर्व्वधातुभ्यष्ट्रन्।" उणा० ४। १५८। इति ष्ट्रन् षित्वात् ङीष्।) चर्म्मरज्जुः। इत्यमरः। २। १०। १३॥ बध्री द्विरेफेति केचित्। बर्द्ध्रां चर्म्मबन्धे भवा बार्द्ध्री दीर्घादिरिति हट्टः॥

बन, द ङ उ याचने। इति कविकल्पद्रुमः॥ (तना०-आत्म०-द्विक०-सेट्। क्त्वावेट्।) द ङ, बनुते। उ, बनित्वा बत्वा। इति दुर्गादासः॥

बन्ध, औ श बन्धे। इति कविकल्पद्रुमः॥ (क्र्या०-पर०-सक०-अनिट्।) औ, अबान्त्सीत्। श, बध्नाति। वस्तान्तं शठ मुञ्च मुञ्च शपथैः किं धूर्त्त निर्बन्धसे। इत्यपपाठः। निर्बध्यते इति पाठ्यमिति रमानाथः। वस्तुतस्तु अस्य गणकृतानित्यतया कर्म्मभावे आत्मनेपदे च सिद्धम्। इति दुर्गादासः॥

बन्ध, क बन्धे। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) क, बन्धयति। इति दुर्गादासः॥ (यथा, रामायणे। २। ८४। ४।

"बन्धयिष्यति वा पाशैरथवास्मान् वधिष्यति॥")

बन्धः, पुं, (बन्ध+हलश्चेति घञ्।) आधिः। बन्धनम्। इति मेदिनी। धे, ८॥ शरीरम्। इति हेमचन्द्रः॥ (कर्म्मजनितादृष्टवशात् देहाद्देहान्तरोत्पत्तेः शरीरस्य तथात्वम्।) गृहादिवेष्टनम्। इति शब्दरत्नावली॥ तद्विवरणं यथा

"रूपाष्टकैर्व्विनिहतो भवनस्य बन्धः
कर्त्तुः स्वगृहमिह युग्मशरैकनिघ्नम्।
एकीकृतं रसनिशाकरयुग्मभुक्त-
शेषं ततो भवति पिण्डपदं गृहस्य॥
गृहभूमिसमाहृतपिण्डपदं
वसुलोचनरन्ध्रगजैर्गुणितम्।
रविभूधरत्रिंशद्वयोगहृत-
मायव्ययस्थितिऋक्षपदम्॥"